# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

## TERM-1_EXAMINATION 2025-26

### SANSKRIT (119)

Class : IX Duration : 3 Hrs
Date : 03.09.2025 Max. Marks : **80**
Admission No.: Roll No.:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 28 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 27 अङ्काः |

---

खण्डः 'क' अपठित-अवबोधनम् (10 अङ्काः)

प्रश्न 01 निम्नलिखितं गद्यांशं पठित्वा तदाचारितान् प्रश्नान् संस्कृतेन उत्तरत-

एकदा एकः कर्तव्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरुपम् अपश्यत्। सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत्। इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः। महापुरुषः हसित्वा अवदत् पश्यन्तु एतान् फलयुक्तान् वृक्षान्। एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि। महापुरुषस्य वचनं श्रुत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान् अनुकरणीया एवं सज्जनानां सज्जनता।

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (1X1=1 अङ्कः)

(1) नगररक्षकः कीदृशं महापुरुषम् अपश्यत्?

(2) कः अवदत् "अवलोकनेन प्रतीयते यत्

(3) केषां सज्जनता अनुकरणीया भवति ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (2X2=4 अङ्काः)

(1) नगररक्षकः अशीतिवर्षीयं महापुरुषं किं कुर्वन् अपश्यत् ?

(2) महापुरुपेण आरोपितस्य वृक्षस्य फलानि के खादिष्यन्ति?

(3) सः महापुरुषः कस्य आरोपणे तल्लीनः आसीत्?

III. क्यानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) (1X3=3 अङ्काः)

(1) 'नगररक्षकः' इति पदस्य विशेषणपदं किम् अस्ति?

(क) इतस्ततः (ख) एकदा

(ग) कर्तव्यपरायणः (घ) परायणः

(2) अस्मिन् गद्यांशे 'व्यर्थम्' इत्यर्थे कः शब्दः प्रयुक्तः?

(क) वृथा (छ) सफलम्

(ग) निष्फलम् (घ) दुष्फलम्

(3) 'दुर्जनानाम्' इति पदस्य कः विलोमशब्दः?

(क) जनानाम् (ख) दुष्टानाम्

(ग) सज्जनानाम् (घ) सत्सङ्गानाम्

(4) अग्मिनू गद्यांशे 'भविष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

(क) पुनः (ख) अहम्

(ग) प्रसन्नः (घ) सन्तुष्टः

IV. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। (1X1=1 अङ्कः)

खण्ड ख रचनात्मकं कार्यं (15 अङ्काः)

प्रश्न 02 भवान् महेशः । भवतः विद्यालये सर्वशिक्षाकार्यक्रमः आयोजितः। स्वविद्यालयस्य कार्यक्रमविषये मित्रं रमेशं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तेः पदैः पूरयित्वा पत्रं पुनः लिखतु-

गृहसंख्या-25

अ-1 मोतीनगरम्

(i) -------------

तिथिः -----------

प्रिय मित्र (ii) -----------

सप्रेम नमो नमः।

अत्र कुशलं तत्रास्तु। मित्रः अस्माकं विद्यालये (iii) -----------सर्वशिक्षा-कार्यक्रमः आयोजितः। वयं छात्राः भिन्नवर्गेषु विभक्ताः भूत्वा विद्यालयस्य समीपस्थानि (iv) --------- गतवन्तः। तत्र लघुकुटीरे (v) ------------ निरक्षरान् जनान् शिक्षायाः महत्वं बोधितवन्तः। बालकान् विद्यालये प्रेषणार्थं तान् (vi) -----------। अस्माकं कार्यक्रमस्य प्रभावेण इदानीम् अस्माकं विद्यालये (vii) ----------- परिमिताः (viii) -----------बालकाः पठितुम् आरब्धवन्तः। भवान् स्वविद्यालयस्य (ix) ----------- विषये लिखतु।

भवदीयं मित्रम् (x) -----------

| मञ्जूषा |
|---|
| गतगुरुवासरे, पञ्चविंशतिः, निवसतः, दिल्लीतः, निर्धनाः, रमेश, कार्यक्रमस्य, अशिक्षितक्षेत्राणि, महेशः, प्रेरितवन्तः |

प्रश्न 03 चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते पञ्च वाक्यानि रचयत- (5X1=5 अङ्काः)



| मञ्जूषा |
|---|
| पिपासितः, काकः, पाषाणखण्डानि, घटस्य, जलम्, वृक्षाः, उपतिष्ठति, क्षिपति, आगच्छति, गृहम्, पर्वताः, उपरि |

अथवा

'साक्षरतायाः लाभाः' इति विषये मञ्जूषायाः पदानां सहायतया सरलसंस्कृते एकं अनुच्छेदं लिखत-

| मञ्जूषा |
|---|
| अक्षरज्ञानम्, जनानाम्, स्वहस्ताक्षरम्, आवेदनपत्रम्, नियुक्तिपत्रम्, राशिपत्रम्, पठितुं शक्यते, कोऽपि वञ्चितुं समर्थः, सर्वकारसमर्थितं जनान्दोलनम् वर्तते, ज्ञानपूर्णग्रन्थानां पठने, चरित्रशिक्षणे, आदर्शशिक्षाग्रहणे। |

प्रश्न 04. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -

राष्ट्रपक्षी मयूरः

प्रत्येकं देशस्य एकः (i) ----- भवति। श्येनः अमेरिकादेशस्य, तथा मयूरः (ii) ------ राष्ट्रपक्षी अस्ति। एषः अतीव (iii) ----- भवति। (iv) ------ यथा यदा एषः मेघान् पश्यति तदा (v) ------ नृत्यति। तस्मिन् काले एतस्य पक्षीणाम् (vi) ------ अद्भुतम् प्रतीयते। मयूरः (vii) ----- खादति। एषः वनेषु (viii) ---------- च वसति। मयूरस्य शिखण्डः दर्शनीयं भवति। अस्य शिरसि शिखण्डः (ix) ------- इव शोभते, अतएव अस्य नाम (x) ------ अपि अस्ति।

| मञ्जूषा |
|---|
| शिखण्डी, भारतदेशस्य, राष्ट्रपक्षी, सौन्दर्यम्, मनोहरः, आनन्देन, उपवनेषु, नृत्यम्, मुकुटम्, सर्पान् |

अथवा

रिक्तस्यानानि पूरयित्वा अघोलिखितसंवादं पुनः लिखत-

आगन्तुकः - बालक! किं तव जनकः (i) ---------- अस्ति ?
बालकः - मान्य ! जनकः औषधाय (ii) ----------- गतः ।
आगन्तुकः - अहं तव (iii) ---------- मित्रं जगदीशचन्द्रः ।
बालकः - नमस्ते ! उपविशतु (iv) ------------- |
आगन्तुकः - तव (v) ---------------- किम् ?
बालकः - (vi) --------- नाम पीयूषः ।
आगन्तुकः - त्वं कस्यां (vii) -------- पठसि ?
बालकः - अहं (viii) ----------- पठामि ।
आगन्तुकः - स्वजनकाय एतत् (ix) -------- यच्छ । अधुना अहं गच्छामि ।
बालकः - अहं (x) -------- निवेदयिष्यामि ।

| मञ्जूषा |
|---|
| भवान्, पुस्तकम्, जनकस्य, नाम, कक्षायाम्, आपणम्, गृहे, जनकाय, सप्तमी-कक्षायाम्, मम |

खण्ड ग अनुप्रयुक्त व्याकरणं (28 अङ्काः)

प्रश्न 05 अधोलिखितवाक्येषु रेखाइङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत- (प्रश्नत्रयम्) (1X3=3)

(1) तथापि (---- + -----) अहमपि भयभीतः न अस्मि ।

(2) अस्य नाटकस्य नै +अकः (---------) कः अस्ति?

(3) लोक + एषणा (---------) न उचिता वर्तते।

(4) सर्वव्यापकः परमेश्वरः (---- + -----) सर्वान् रक्षेत् ।

प्रश्न 06 रेखाङ्किपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत- (प्रश्नत्रयम्) (1X3=3)

(1) षडेते पाठकगुणाः सन्ति ।

(क) पाठकस्य गुणाः (ख) पाठके गुणाः

(ग) पाठकात् गुणाः (घ) पाठं करोति यः सः

(2) नकुलं बालस्य रक्षायां व्यवस्थाप्य अगच्छत्।

(क) बालारक्षायां (ख) बालरक्षायां

(ग) बालरक्षायां समम् (घ) बालेरक्षायां

(3) ब्रह्मणः नकुलं रक्तविलिप्तमुखम् अपश्यत्।

(क) रक्तेन विलिप्तं मुखम् (ख) रक्तैः विलिप्तं मुखम्

(ग) रक्ताय विलिप्तं मुखम् (घ) रक्तस्य विलिप्तं मुखम्

(4) दशरथस्य पुत्रः रामः वनम् अगच्छत्।

(क) दशरथीपुत्रः (ख) दाशरथपुत्रः

(ग) दशरथपुत्रः (घ) राजपुत्रः

प्रश्न 07 अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृतपदेषु समयं लिखत-(प्रश्नत्रयम्) (1X3=3)

(1) प्रातः (7:45) -------------- वादने विद्यालयस्य प्रार्थना भवति ।

(2) अनन्तरं (8:15) ------------ वादने कक्षाः आरभन्ते ।

(3) मध्याह्ने (12:00) ---------- वादने भोजनावकाशः भवति ।

(4) सायं (3:30) ----------- वादने छात्राः गृहं गच्छन्ति ।

प्रश्न 08 निम्नवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत-(प्रश्नचतुष्टयम्) (1X4=4)

| मञ्जूषा |
|---|
| बहिः, मा, किमर्थम्, यावत्, कुतः |

(1) सः --------------- वाराणसीं गमिष्यति ?

(2) त्वम् ------------------- समागतोऽसि ?

(3) ग्रामात् ---------- एकं सुन्दरम् उद्यानम् अस्ति ।

(4) ---------- परोपकारः क्रियते तावत् शरीरस्य उपयोगः ।

(5) ध्वनिं ----------- कुरु ।

प्रश्न 09 रेखाङ्कितपदेषु प्रकृति-प्रत्यययोः संयोज्य विभज्य वा उत्तरं चित्वा लिखत - (प्रश्नचतुष्टयम्) (1X4=4)

(1) छात्रः विद्यालयम् आ + गम् + ल्यप् पठति ।

(क) आगत्य (ख) आगत्वा

(ग) आगन्तुम् (घ) आगतः

(2) रामः रावणं हन् + क्त्वा अयोध्यां प्रत्यागच्छत् ।

(क) हनित्वा (ख) हन्तुम्

(ग) हत्वा (घ) हनवा

(3) माता भोजनं पच् + तुमुन् महानसं प्रविशति ।

(क) पचितुम् (ख) पकतुम्

(ग) पक्तुम् (घ) पक्तम्

(4) मम जननी <u>हसन्</u> अवदत् ।

(क) हस् + शानच् (ख) हस् + शतृ

(ग) हस् + ल्यप् (घ) हस् + क्तवतु

(5) <u>क्रीड् + शतृ</u> बालिकां आह्वयतु ।

(क) क्रीडन् (ग) क्रीडन्तीम्

(ख) क्रीडन्तीं (घ) क्रीडन्त्यौ

प्रश्न 10 उपपदविभक्ति-नियमानुसारेण उचितपदेन रिक्तस्थानपूर्तिः कर्तव्या -(प्रश्नचतुष्टयम्) (1X4=4)

(1) --------- परितः कमलानि दृश्यन्ते।

(क) तडागस्य (ख) तडागेन

(ग) तडागम् (घ) तडागात्

(2) सूरदासः --------- अन्धः आसीत् ।

(क) नेत्राभ्याम् (ख) नेत्रेण

(ग) नेत्रयो: (घ) नेत्रैः

(3) विकलाङ्गः ------------ मूकः नासीत्।

(क) अष्टावक्राय (ख) अष्टावक्रेण

(ग) अष्टावक्रान् (घ) अष्टावक्रः

(4) ॐ ----------- नमः |

(क) कृष्णस्य (ख) कृष्णं

(ग) कृष्णाय (घ) कृष्ण:

(5) रामः --------- सह वनम् अगच्छत् |

(क) सीताभिः (ख) सीतया

(ग) सीताभ्यां (घ) सीतायै

प्रश्न 11 प्रदत्त विकल्पेभ्यः शब्दरूपस्य उचितं रूपं चित्वा वाक्यपूर्तिः क्रियताम् – (प्रश्नचतुष्टयम्) (1X4=4)

(1) बालकाः ---------- स्नानं कृत्वा मोदन्ते। (नदी – सप्तमी एकवचनं)

(क) नदीम् (ख) नद्याम्

(ग) नद्याः (घ) नद्यै

(2) जगतः -------- वन्देपार्वती-परमेश्वरी । (पितृ – द्वितीया द्विवचनं)

(क) पितरौ (ख) पितरः

(ग) पिता (घ) मातरौ

(3) गुरूः ---------- छात्रान् पाठ्यति। (विद्यालय – सप्तमी एकवचनं)

(क) विद्यालयस्य (ख) विद्यालयाणाम्

(ग) विद्यालयेभ्यः (घ) विद्यालये

(4) ------- विद्यालयः महाराष्ट्रराज्ये प्रसिद्धः अस्ति । (अस्मद् – षष्ठी बहुवचनं)

(क) अहं (ख) अस्मभ्यं

(ग) अस्माकं (घ) युष्माकं

(5) भारते -------- महिलाः देवीवत् पूज्यन्ते | (एतत् – प्रथमा बहुवचनं)

(क) एताः (ख) एते

(ग) एताभिः (घ) तासु

प्रश्न 12 निम्नप्रश्नानाम् उत्तराणि धातुरूपाणां निर्देशानुसारेण विकल्पेभ्यः चित्वा लिखत -(प्रश्नत्रयम्(1X3=3)

(1) 'कुर्यात्' इति पदे कः लकारो वर्तते ?

(क) लोट्　　(ख) विधिलिङ्
(ग) लट्　　(घ) लुट्

(2) 'श्रृ' धातोः लृट् लकारस्य रूपम् किम् ?
(क) कथयिष्यति　　(ख) चलिष्यति
(ग) वदिष्यति　　(घ) श्रोष्यति'

(3) 'भू' धातोः लङ् लकारस्य मध्यमपुरुषस्य एकवचने किं रूपं भवति ?
(क) अभवताम्　　(ख) अभवत्
(ग) अभवम्　　(घ) अभवः

(4) 'पठ् धातोः रूपम् किम् अस्ति ?
(क) पठनम्　　(ख) पाठम्
(ग) पठेयम्　　(घ) वाचनम्

पठितावबोधनम् (27 अंकात्मकः)

प्रश्न 13 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् "कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये ।" साऽवदत् - "मुने ! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम् । किञ्च इतः धर्मव्याधाख्यं कञ्चन मांस-विक्रयिणं गत्वा एतत् पृच्छ । ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति।" एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत् ।

I. एकपदेन उत्तरत-　(प्रश्नमेकम्)　　(1X2=1)
(i) साध्वी किम् आदाय मुनेः अन्तिकम् आगता ?
(ii) मांसविक्रयिणः किं नाम आसीत्?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्)　　(1X2=2)
(i) सा मुनिं किम् अवदत् ?
(ii) कीदृशः मुनिः तां प्रणम्य निरगच्छत् ?
(iii) स मुनिः कां प्रणम्य तद्गृहाद् निरगच्छत् ?

III. भाषिककार्यम्- (प्रश्नद्वयम्)　　(1X2=2)
(i) अनुच्छेदे 'समीपम्' इत्यस्य पदस्य कृते किं पदम् आगतम् ?
(क) अन्तिकम्　　(ख) आदाय
(ग) अभिहितः　　(घ) ज्ञातम्
(ii) 'भविष्यसि' क्रियापदस्य कर्तृपदं किम् ?
(क) त्वम्　　(ख) अहम्
(ग) श्रेयः　　(घ) ताः
(iii) 'अकल्याणम्/प्रेयः' इत्यस्य पदस्य अनुच्छेदे कः विपर्ययः प्रयुक्तः ?
(क) भर्तुः　　(ख) श्रेयः
(ग) ज्ञातः　　(घ) अभिहितः

प्रश्न 14 अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥

I. एकपदेन उत्तरत-　(प्रश्नमेकम्)　　(1X2=1)

(i) कैः प्रोक्तं वाक्यं शिलालिखितमिव भवति ?

(ii) असद्भिः कथम् अपि असत्यमेव कथ्यते?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1X2=2)

(i) सद्भिः लीलया प्रोक्तं वाक्यं कथं भवति ?

(ii) असदः वाक्यं कीदृशं भवति ?

(iii) सद्भिः लीलया कथं प्रोच्यते ?

III. भाषिककार्यम्- (प्रश्नद्वयम्) (1X2=2)

(i) 'कथितम्' इत्यस्य पदस्य अर्थे श्लोके किं पदं प्रयुक्तम् ?

(क) लिखितम् (ख) प्रोक्तम्

(ग) सद्भिस्तु (घ) असद्भिः

(ii) श्लोके 'प्रोक्तम्' इति क्रियायाः कर्तृपदं किम्?

(क) सद्भिस्तु (ख) सद्भिः

(ग) असद्भिः (घ) शिलालिखितम्

(iii) 'लिखितम् अक्षरम्' अनयोः पदयोः विशेषणं किम् ?

(क) अक्षरम् (ख) लिखितः

(ग) लिखितम् (घ) अक्षरः

प्रश्न 15 अधोलिखितं नाट्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

(निस्सरति प्रतापः, भटाः चापि तमनुसरन्ति, तमेवं स्वतन्त्रताप्राप्तिं प्रति निराशं दृष्ट्वा अटवीवासिनो मिल्लाः दुःखीयन्ति)

प्रथमः भिल्लः - हा धिक् ! कीदृशः समय आगतः ! देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः।

द्वितीयः भिल्लः- न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम् ? हा निष्ठुर दैव। देशभक्ते तु दयस्व ।

तृतीयः भिल्लः- वराकोऽयं जीवनसामग्रीयुद्धसामग्र्योः अभावेन खिद्यते। परमेश्वर! दयस्व ! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? (सर्वे भिल्लाः विलपन्ति)

एकः सैनिकः- हा दैव! कथं देशधर्मो प्रति निष्ठुरः सञ्जातोऽसि ? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम् ।

सर्वे सैनिकाः - परतन्त्रे देशे जीवनं नरकायते । न शक्नुमः प्राणान् धारयितुम् ।

I. एकपदेन उत्तरत- (प्रश्नमेकम्) (1X2=1)

(i) सैनिकः स्वचक्षुषा किं न द्रष्टुं शक्नोति ?

(ii) भटाः कम् अनुसरन्ति ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1X2=2)

(i) वराकः प्रतापः कथं खिद्यते ?

(ii) कुत्र जीवनं नरकायते ?

(iii) द्वितीयः भिल्लः किं प्रार्थयति ?

III. भाषिककार्यम्- (प्रश्नद्वयम्) (1X2=2)

(i) 'शक्नोति' पदस्य उत्तमपुरुषे किं पदं संवादे आगतम् ?

(क) शक्नोसि (ख) शक्नोषि

(ग) शक्नोमि (घ) शक्नुवन्ति

(ii) 'दयाहीनः' इत्यस्य पदस्य अर्थे संवादे किं पदम् आगतम् ?

(क) दुर्दशाम् (ग) खड्गेन

(ख) निष्ठुरः (घ) प्राणान्

(iii) संवादात् 'क्त' प्रत्यययुक्तम् एकं पदं चित्वा लिखत-

(क) दयस्व (ख) प्रस्थितः

(ग) लिखिताम् (घ) परित्यज्य

प्रश्न 16 रेखांकित पदमाधृत्य प्रश्ननिर्माणम् कुरुत - (पञ्चप्रश्नाः) (1X5=5)

(1) माधवः उज्जयिन्याम् अवसत्।

(2) मथ्यमानात् काष्ठात् अग्निर्जायते।

(3) वीरगत्या मरणमेव कल्याणप्रदं भवति।

(4) अविवेकता अपि अनर्थाय।

(5) वृक्षस्य उपरी बलाका आसीत्।

(6) अहंकारेण ज्ञानं नश्यति।

प्रश्न 17 निम्नलिखितश्लोकानाम् उचितैः पदैः अन्वयं पूरयन् सम्यक्तया रिक्तस्थानानि सम्पूरयत- (½X4=2)

काष्ठादग्निर्जायते मथ्यमानाद्, भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां, मार्गारब्धाः सर्वयत्नाः फलन्ति ॥

अन्वयः - (i) ---------- काष्ठात् अग्निः जायते, (ii) ------------ भूमिः तोयं ददाति ।
सोत्साहानां (iii) --------- असाध्यं नास्ति (iv) ---------- सर्वयत्नाः फलन्ति ।

मञ्जूषा

खन्यमाना, मथ्यमानात्, मार्गारब्धाः, नराणाम्

अथवा

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥

अन्वयः - सुजनता (i) ----------, वाक्संयमः शौर्यस्य, उपशमः (ii) ---------, विनयः कुलस्य, पात्रे व्ययः वित्तस्य, अक्रोधः (iii) ----------, क्षमा बलवतां निर्व्याजता धर्मस्य विभूषणं (वर्तते), सर्वेषाम् अपि इदं (iv) ---------- (परं) शीलं परं भूषणम् (अस्ति)।

मञ्जूषा

ज्ञानस्य, ऐश्वर्यस्य, सर्वकारणम्, तपसः

प्रश्न 18 मञ्जूषायाः पदसहायतया कथापूर्तिं कृत्वा उत्तर पुस्तिकायां पुनः लिखत - (½X10=5)

उज्जयिनी नगरे एकः (i) -------- नामकः ब्राह्मणः अवसत् । सः एकं नकुलम् पुत्रम् इव अपालयत् । तस्य एकः बालः (ii) -------- आसीत् । एकदा तस्य पत्नी अपत्यस्य (iii) -------- ब्राह्मणं नियोज्य स्नानं कर्तुं गता। अत्रान्तरे माधवः (iv) -------- श्राद्धं कारयितुं नृपेण आमन्त्रितः । दरिद्रतायाः कारणेन (v) --------- अचिन्तयत् यत् यदि अहं राजप्रसादं शीघ्रं न (iv) ------- तदा तत्र अन्यः कश्चिद् ब्राह्मणः आगत्य श्राद्धं (vii) --------- तदा तु मम हानिः भविष्यति। काचिद् वार्ता नास्ति । इमं पुत्रवत् चिरेण पालितं (viii) -------- बालकस्य रक्षायां व्यवस्थाप्य गच्छामि । अयमेव बालकस्य (ix) --------- भ्रातृवत् करिष्यति । इदं विचिन्त्य ब्राह्मणः बालरक्षायां विधाय (x) -------- गतः ।

मञ्जूषा

नकुलं, ग्रहीष्यति, रक्षाम्, रक्षार्थम्, माधवः, ब्राह्मणः, पुत्रः, राजगृहे, राजप्रासादं, गच्छामि

==================== सफलतायै शुभाशयाः ====================